# Mrityunjaya Pushpanjali

# મૃત્યુઞ્જયપુષ્પાઞ્જલિઃ

## Document Information

Text title : Mrityunjaya Pushpanjali

File name : mRRityunjayapuShpAnjaliH.itx

Category : shiva, vAsudevanElayath

Location : doc_shiva

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# મૃત્યુઞ્જયપુષ્પાઞ્જલિઃ

ખણ્ડઃ ૧

શશિશકલાઞ્ચિતકુઞ્ચિતપિઙ્ગજટાતડિદુજ્વલમૂર્ધતલં
ભાલવિલોચનમઞ્જનમઞ્જુલનીલગલં શિતશૂલધરમ્ ।
ફણિગણભૂષણમાકલયે તવ ભીમમિદં શિવમઙ્ગમહં
શ્વેતવનાલય, કાલવિમર્દન, ભક્તજનાર્દન, વિશ્વપતે ॥ ૧॥

ખણ્ડઃ ૨

પઞ્ચાક્ષરવર્ણમાલાસ્તોત્રમ્ ।

ઓઙ્કારશુક્તિપુટમુક્તામણિં શિવમહઙ્કારભઞ્જનકરં
હ્યીઙ્કારતત્વલલિલતાર્ધે ભજામિ હૃદિ સઙ્કાશમાનવપુષમ્ ।
ત્વાઙ્કાલખણ્ડન, ભુજઙ્ગેન્દ્રમણ્ડન, વૃષાઙ્કાત્મકં શિખિશિખા-
સઙ્કાશપિઙ્ગલજટાજુટસઙ્ગતશશાઙ્કાભિરામશિરસમ્ ॥ ૧॥

નક્તન્દિવં ભયદવિન્તાતુરં સમનુરક્તં દુરન્તવિષયે
રિક્તં ગુણૈઃ સુજનકામ્યૈર્મનો મમ તુ તિક્તં ચ પાતકશતૈઃ ।
વ્યક્તં ભવત્યુપહરામિ; પ્રસીદ કુરુ ભક્તં વિષશન, વિભો,
મુક્તં ભયાદ્ભવતુ સત્કર્મનિર્વહણશક્તં ચ જીવિતમિદમ્ ॥ ૨॥

મર્ત્યં ભવચરણપાથોજસેવિનમમર્ત્યં કરોડપિ ભગવન્;
સત્યં મમાસ્તુ રતિરેતદ્ભવદ્ભજનકૃત્યં વિધાતુમુચિતમ્ ।
અત્યન્તપાવનનિલોપાન્તવાસપર, મૃત્યુઞ્જયાખિલપતે,
શ્રુત્યન્તગોચરમહાતત્વરૂપ, મયિ નિત્યં પ્રસીદતુ ભવાન્ ॥ ૩॥

શિઞ્જાનપાદકટકાનન્દનૃત્તરતકઞ્જાભિરામચરણં
ત્વઞ્જાહ્યવીધવલમાલાસમુલ્લસનસઞ્જાતશોભમુકુટમ્ ।
ભઞ્જાનમન્તકનઙ્ગાન્તકં સુકૃતપુઞ્જાભિગમ્યમમલં
સઞ્જલ્પિતસ્તુતિવિરિઞ્જાદિસેવ્યમિહરઞ્જદ્રસં હૃદિ ભજે ॥ ૪॥

વાતાશનાકલિતભૂષાગણં ભસિતપૂતાઙ્ગરાગમહિતં

શીતંશુભાસ્કરહુતાશાક્ષમુલ્લસિતભૂતાવલીપરિગતમ્ ।
હે તાણ્ડવગપ્રિય, ચિદાનન્દરૂપ, પરિભૂતાન્તકં તવ વપુ-
ર્ભીતાભયપ્રદમુપાસે; પ્રસીદ મયિ જાતાનુકમ્પમનિશમ્ ॥ ૫॥

યત્ર પ્રભો, પરમભક્તો મૃકણ્ડમુનિપુત્રસ્તવાઙ્ઘ્રિભજના-
દત્રસ્તભાવમિહ લેભે યમાદપિ પરિત્રાસિતાખિલજનાત્ ।
તત્ર સ્વધામનિ પરકોડનામનિ ચરિત્રપ્રશસ્તિમહિતે
ક્ષેત્રે વિભાસિ જગતાં ભાગ્યરાશિરતિમાત્રં, પ્રસિદ ભગવન્! ॥ ૬॥

મહાદેવ, સ્વામિન્, મધુરકરુણાદિવ્યજલધે,
પરકોડાવાસ,પ્રકટિતનિજૈશ્વર્યમહિમન્ ।
સ્તવૈરેભિર્વિલ્વૈસ્તવ ચરણયોરર્ચનમહં
કરોમિ ત્વં ભક્ત્યા કલિતમિદમઙ્ગીકુરુ વિભો! ॥ ૭॥

ઇહાનેકૈર્મન્ત્રૈર્બહુભિરપિ તન્ત્રૈર્નિયમિતં
ભવત્પૂજાહોમાદિકમહમશક્તો રચયિતુમ્ ।
જુહોમિ બ્રહ્માગ્નૌ ત્વયિ હવિરિદં માનસમયં
ગૃહાણ ત્વં મૃત્યુઞ્જય, વરદ, પૂર્ણાહુતિમિમામ્ ॥ ૮॥

ભવારણ્યે ઘોરે વિષયરસનવ્યોલપચયૈઃ
સમાચ્છન્ને કૂપે નિરતિશયદુઃખે નિપતિતમ્ ।
પશું ક્રન્દન્તં માં કરુણકરુણં, પાહિ કૃપયા
સ્વધર્માનુષ્ઠાનં ખલુ સમુચિતં તે પશુપતે! ॥ ૯॥

ઇહ શ્વેતારણ્યે ભુવનવિદિતે સર્વમહિતે
મહાસિદ્ધિક્ષેત્રે સકરુણ, ભવન્તં ભયહરમ્ ।
સમભ્યર્ચ્ય પ્રેષ્ઠાં ગતિમસુલભાં પ્રાપ સુકૃતી
મુનિર્માર્કણ્ડેયસ્તવ હિ મહિમાઽયં વિજયતે ॥ ૧૦॥

પરં બ્રહ્મ સ્વેચ્છાકલિતશિવલિઙ્ગાત્મકવપુઃ
પ્રતિષ્ઠાં ક્ષેત્રેઽસ્મિન્ સ્વયમુપગતં ભાસિ ભગવન્ ।
ઇહાભેદં વિષ્ણોસ્તવ ચ દદૃશુઃ કાલનિધને
મહે ભક્તોત્તંસા મુદિતમનસો વિસ્મયવશાઃ ॥ ૧૧॥

ધૃતદ્વૈતં રૂપં પુનરપરમેતત્તવ નિલા-
સરિત્તીરેઽદૂરે પરિલસતિ નાવાખ્યનિલયે ।
યદમ્ભોદાનીલં કરકલિતશઙ્ખારિવિલસદ્

ગદાપદ્મં પદ્માસુકૃતનિલયં મઞ્જુહસિતમ્ ॥ ૧૨॥

લસદ્દ્વૈતાદ્વૈતં પરમશિવ, શમ્ભો, તવ વપુઃ
પરાનન્દાકારં મનસિ મમ નિર્ભાતુ સતતમ્ ।
યતોઽહં ભયાસં વિગલિતભવક્લેશનિવહઃ
સ્વધર્માનુષ્ઠાનૈસ્તવ વિરચયન્ સેવનવિધિમ્ ॥ ૧૩॥

પરાશક્તિઃ સૂક્ષ્મા ભવતિ પરમં તત્ત્વમિહ વૈ
વદન્ત્યોતપ્રોતં જગદિતિ ચ વૈજ્ઞાનિકવરાઃ ।
પ્રભો, ત્વત્સાન્નિધ્યાદિયમપિ પરિસ્પન્દકુશલા
હ્યધિષ્ઠાનં મુખ્યં ત્વમસિ જગતસ્તે નતિરિયમ્ ॥ ૧૪॥

ભવન્નિષ્ઠં ચિત્તે ભવતુ ભગવન્, વાગપિ ભવત્-
સ્તુતૌ સક્તા નિત્યં, વપુરપિ ભવત્સેવનરતમ્ ।
વિકાસોઽયં ભક્તેર્મધુરમધુનિષ્યન્દસુભગઃ
પરપ્રેમાકાર, પ્રસરતુ મમાત્મન્યનુદિનમ્ ॥ ૧૫॥

પ્રવૃદ્ધાયાં ભરતૌ ભવતિ હૃદયં નિર્મલતરં
સમસ્તં કર્મ ત્વચ્ચરણવરિવસ્યાઽપિ ચ ભવેત્ ।
તતો જાનીયાં ત્વાં નિરતિશયચૈતન્યવપુષં
પરબ્રહ્માભિખ્યં શિવમખિલલોકૈકપિતરમ્ ॥ ૧૬॥

અખણ્ડે બ્રહ્માણ્ડે નિરુપમચિદાનન્દવપુષં
સ્વયા શક્ત્યા સાકં કૃતનટનલીલાવિલસિતમ્ ।
તથા સૂક્ષ્માત્માનં સ્થિતમણુષુ સૂક્ષ્મેષુ ભગવન્,
ભવન્તં સંવીક્ષ્ય પ્રતિકલમુપેયાં હૃદિ મુદમ્ ॥ ૧૭॥

નટેશ, ત્વત્તાલપ્રસરસુભગં જીવિતમિદં
પ્રભો, જીવન્મુક્તિઃ ખલુ નિગદિતા શાસ્ત્રસરણૌ ।
પદેઽસ્મિન્નુત્તુઙ્ગે ગિરિશ, ગિરિશૃઙ્ગે પશુરયં
વિહર્તું શક્તઃ સ્યાદ્યદિ ભવતિ ભક્તઃ પશુપતે! ॥ ૧૮॥

પરક્રોડાવાસિન્, પરમશિવ, મૃત્યુઞ્જય, મનો-
ભવારાતે, ભક્તપ્રિય, ગિરિસુતાઽલિઙ્ગિતતનો,
વિપન્નિસ્તારં મે પ્રદિશ ભગવન્, માં કુરુ ભવત્-
પાદામ્ભોજે ભક્તં; ન ખલુ ન ખલુ પ્રાર્થ્યમપરમ્ ॥ ૧૯॥

ઇતિ શ્રીવાસુદેવન્ એલયથેન વિરચિતા મૃત્યુઞ્જયપુષ્પાઞ્જલિઃ સમાપ્તા ।

*Mrityunjaya Pushpanjali*
pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*